# अथ सटीका शिवस्तुतिः

मूल्यम् ३ आणकाः ।

॥ श्रीलक्ष्मीनृसिंहाय नमः ॥

# अथ सटीका शिवस्तुतिः ।

श्रीमन्तं विठ्ठलं नत्वा पूर्णबोधेष्टदैवतम् ।
शिवस्तुतेस्तु व्याख्यानं व्यञ्जयामि यथामति ॥

श्रीरामेश्वरदर्शनार्थं सेतुबन्धनगतैर्नारायणपण्डिताचार्यैः पिहितं देवालयकवाटं दृष्ट्वा तद्विवृत्यर्थं रामेश्वरस्य स्तुतिः कृता । कवाटविवृतिश्च स्वयमेव जातेति सम्प्रदायविदः प्राहुः ॥ तत्रायमाद्यः श्लोकः—

स्फुटं स्फटिकसप्रभं स्फुटितहाटकश्रीजटं शशाङ्कदलशेखरं कपिल-
फुल्लनेत्रत्रयम् । तरक्षुवरकृत्तिमद्भुजगभूषणं भूतिमत्कदानु शितिकण्ठ ते
वपुरवेक्षते वीक्षणम् ॥ १ ॥

स्फुटमिति ॥ शितिर्नीलः कण्ठो यस्य स तथोक्तस्तस्य सम्बुद्धिः । हे शितिकण्ठ रुद्र । ते तव । स्फुटं सम्यक् । समाना प्रभा यस्य तत्सप्रभं स्फटिकेन सप्रभं स्फटिकसप्रभं तत् । स्फटिकवच्छ्वेतवर्णमित्यर्थः ॥ स्फुटितहाटकश्रीजटं स्फुटितं वह्निसंयोगादिना विभिन्नं (सन्तप्तं) यद्धाटकं सुवर्णं 'हैमं रुग्मं हाटकं शातकुम्भ'मिति हलः । तद्वच्छ्रीजटाः श्रिया कान्त्या युक्ता जटा यस्य तत्तथोक्तं तत् । शशाङ्कदलशेखरं शशस्याङ्कश्चिह्नं यस्मिन् स शशाङ्कश्चन्द्रस्तस्य दलमर्धं तच्छेखरे चूडायां यस्य वपुषस्तत्तथोक्तं तत् । कपिलफुल्लनेत्रत्रयं कपिलानि पिङ्गलवर्णानि फुल्लानि विकसितानि यानि नेत्राणि तेषां त्रयं यस्मिंस्तत्तथोक्तं तत् । तरक्षुवरकृत्तिमत् तरक्षोर्व्याघ्रस्य 'व्याघ्रो द्वीपी पुण्डरीकस्तरक्षु'रिति हलः । वरकृत्तिरुत्तमा या कृत्तिश्चर्म सास्यास्तीति तथोक्तं तत् । व्याघ्रचर्मालङ्कृतकटिप्रदेशवदित्यर्थः । भुजैर्गच्छन्तीति भुजगाः सर्पास्त एव भूषणान्याभरणानि यस्मिंस्तत्तथोक्तम् । भूतिर्भस्मास्मिन्नस्तीति भूतिमत् । भस्मोद्धूलितसर्वावयवोपेतमित्यर्थः ।

भूतिमदैश्वर्यवदितिवा । 'भूतिः श्रीजन्मभस्मस्वि'ति वैजयन्ती । एवंविधं वपुः शरीरम् । मे मम वीक्षणं नेत्रम् । कदानु कस्मिन् काले वा । अनु लक्षीकृत्येति वा । अवेक्षते वीक्षते विषयीकरिष्यतीत्यर्थः । 'ईक्ष दर्शनाङ्कनयो'र्लट् । अनेन श्लोकेन सदाशिवस्य सर्वाङ्गवर्णनं कृतं भवति ॥ १ ॥

टिप्पणी—शिवहृत्पद्मनिलयं श्रीनृसिंहं नमन्नहम् । शिवस्तुतेः श्रीनिवासः कुर्वे टिप्पणिकां नवाम् ॥ (वीक्षतेऽनेनेति वीक्षणं कर्तृ । वपुः कर्म अवेक्षते । करणे कर्तृत्वोपचारः ।) स्फटिकसप्रभम् । हाटकश्रीजटमित्युभयत्रवाचकधर्मलोपाल्लुप्तोपमालंकारौ स्फुरस्फटटल्यादि व्यंजनावृत्या वृत्त्यनुप्रासः शब्दालंकार इत्येतेषां तिलतण्डुलवत्संसृष्टिः । 'उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः । वर्ण्योपमानधर्माणामुपमावाचकस्य । एकद्वित्र्यनुपादानेभिन्ना लुप्तोपमाष्टधा ।' 'आवृत्तवर्णसम्पूर्णं वृत्त्यनुप्रासवद्वच' इति च लक्षणे कदान्ववेक्षत इत्यनेन कविगतः शिवविषयकभक्तिभावो व्यज्यते ॥ १ ॥

एवंविधस्य रुद्रस्य माहात्म्यवर्णनपूर्वकं प्रसादं प्रार्थयते—

त्रिलोचन विलोचने लसति ते ललामायिते स्मरो नियमघस्मरो नियमिनामभूद्भस्मसात् । स्वभक्तिलतया वशीकृतवती सतीयं सती स्वभक्तवशतो भवानपि वशी प्रसीद प्रभो ॥ २ ॥

त्रिलोचनेति ॥ त्रीणि लोचनानि नेत्राणि यस्य स त्रिलोचनस्तस्य सम्बुद्धिः हे त्रिलोचन शिव । ललामवत्तिलकवदाचरतीति ललामायितं तस्मिँल्ललामयिते । 'ललामोऽस्त्री ललामापि प्रभावे पुरुषे ध्वजे । श्रेष्ठे भूषा पुण्ड्रशृङ्गपुच्छचिह्नाश्व शृङ्गि'ष्विति वैजयन्ती । तृतीयदृष्टेर्ललाटे विद्यमानत्वेन पुण्ड्सदृश इत्यर्थः । ते तव । विशिष्टं च तल्लोचनं च विलोचनं तस्मिन् विलोचने । लसति प्रकाशमाने सति । स्वतपोविघ्नार्थमागतं कामं दृष्ट्वा ज्वलनवज्जाज्वल्यमाने सतीत्यर्थः । नियम इन्द्रियजयो येषामस्तीति नियमिनस्तेषां विश्वामित्रादीनां नियमस्येन्द्रियजयस्य घस्मरो विनाशकः स्मरः कामः 'मारः स्मरो मन्मथ' इति हलः । भस्मसात् भस्ममात्रमभूत् । अनेन स्वावरचेतनैर्बलात्कारेण

वञ्चनादिना वशीकर्तुमशक्यत्वं दर्शितम् । सती पतिव्रता 'सती साध्वी पतिव्रते'त्यमरः । सती सतीनाम्नी पार्वती । स्वस्याः पार्वत्या या भक्तिः रुद्रे भक्तिः सैव लता तया । यं रुद्रं वशीकृतवती अवशो वशः सम्पद्यते तं तथा करोतीति वशीकृतवती । अतो भवान् स्वभक्तवशतः स्वस्यात्मनो ये भक्तास्तेषां वशोऽधीनस्तस्मादिति ततः । भावप्रधानो निर्देशः । स्वभक्तवशत्वत इत्यर्थः । वशी अन्याधीनशीलः । अनेन भक्ताधीनत्वं दर्शितम् । एतादृशमाहात्म्योपेत प्रभो सर्वसमर्थ शिव । त्वं मे प्रसीद प्रसन्नो भवेत्यन्वयः । 'षद्लृ विशरणगत्यवसादनेषु' लोट् ॥ २ ॥

टिप्पणी—(ललामायित रत्नवदाचरित । भवान् वशी स्वतन्त्रः तथापि स्वभक्तवशतः स्वकीय-भक्ताधीनत्वतः मह्यं प्रसीद) ललामायित इति वर्तुलत्वादिधर्मस्यानुपादानाल्लुप्तोपमा । भक्तिरेव लतेति रूपकालंकारः । वृत्त्यनुप्रासश्च स्मरः स्मरः सती सतीति । पुनरुक्तवदाभासश्च । 'विषय्यभेदताद्रूप्यरंजनं विषयस्य यत् । रूपकम्' । 'पुनरुक्तप्रतीकाशं पुनरुक्तार्थसन्निभम्' स्वभक्तवशत्वस्य सत्या भक्तिवशीकृतत्वेन समर्थनाद्वाक्यार्थहेतुककाव्यलिंगालंकारश्च' 'हेतोर्वाक्यपदार्थत्वे काव्यलिंगमुदाहृतम्' ॥ २ ॥

महेशादिपञ्चरूपिणं स्तुवन् स्वाभीष्टं प्रार्थयते—

॥ ३ ॥ **महेश महितोऽसि तत्पुरुष पूरुषाग्र्यो भवानघोर रिपुघोर तेऽनवम वामदेवाञ्जलिः । नमः सपदिजात ते त्वमिति पञ्चरूपोऽञ्चितः प्रपञ्चय च पञ्चवृन्मम मनस्तमस्ताडय ॥ ३ ॥**

महेशेति ॥ महांश्चासावीशश्च महेशस्तस्य सम्बुद्धिः हे महेश महेशनामक त्वम् । महितो देवमुन्यादिभिः पूजितः । असि भवसि । तत्पुरुष तत्पुरुषनामक । स चासौ पुरुषश्च तत्पुरुषः देवेषु प्रसिद्धपुरुषः। भवान् । पुरुषेषु चेतनेषु अग्र्यः श्रेष्ठः पूरुषाग्र्यो भवसि । रिपूणां शत्रूणां घोरो भयङ्करस्तस्य सम्बुद्धिः हे रिपुघोर । घोरोऽमङ्गलो न भवतीत्यघोरस्तस्य सम्बुद्धिः हे अघोर अघोरनाक । ते तुभ्यं नमस्कारत्वेनाञ्जलिर्हस्तद्वयसम्बन्धः । अस्तु । ॥ ३ ॥ अवमोऽवरो नभवतीत्यनवमस्तस्य सम्बुद्धिः हे अनवम देवश्रेष्ठेत्यर्थः । वामेन सौख्येन दीव्यतीति वामदेवः । यद्वा वामो दैत्यानां विरुद्धः स चासौ देवश्चेति वामदेवस्तस्य सम्बुद्धिः हे वामदेव वामदेवनामक । 'वामस्तु सौख्ये सव्यप्रतीपयो'रिति वैजयन्ती । ते तुभ्यमञ्जलिरस्तु । सपदि सद्यो जातश्चतुर्मुखललाटात्प्रादुर्भूतः सपदिजातः तस्य सम्बुद्धिः हे सपदिजात सद्योजातनामकेत्यर्थः ते तुभ्यं नमोऽस्तु इत्युक्तप्रकारेण पञ्च रूपाणि यस्य स पञ्चरूपस्त्वमञ्चितो मया पूजितः सन् । पञ्चधा वर्तत इति पञ्चवृत् मनो बुद्धिरहङ्कारश्चित्तं चेतनेति पञ्चविधमित्यर्थः । मनोऽन्तःकरणं तत् प्रपञ्चय विस्तारं प्रापय । परापरवस्तुविषयं वृत्तिरूपं ज्ञानमभिवर्धयेत्यर्थः । तमोऽज्ञानं तत् ताडय च नाशय च । 'तड आघाते' लोट् ॥ ३ ॥

टिप्पणी —(तत्पुरुष तस्य परमात्मनः पुरुषो दासस्तस्य सम्बुद्धिः । वामदेव वामः सुन्दरो देवो यस्या सौ वामदेव । अघोर भक्तानामभयंकर । तमोमोहमहामोहतामिस्रमिति पंचधा भिन्नं तमोऽविद्यां ताडय । 'ईशानः सर्वविद्यानामीश्वरः सर्वभूतानाम्' 'तत्पुरुषाय विद्महे' 'अघोरेभ्योऽथ घोरेभ्यः' 'वामदेवाय नमः' 'सद्योजातं प्रपद्यामि' इति श्रुतयः) तत्पुरुषोऽपि तस्य दासोऽपि पुरुषाग्र्यः । अघोरोऽपि

घोर इति विरोधाभासाद्विरोधाभासोऽलंकारः । 'आभासत्वे विरोधस्य विरोधाभास इष्यते' इति लक्षणम् । पंचविधमनोविस्तारीकरणे पंचविधतमस्ताडने च पंचरूपविशिष्टस्यैव शक्तत्वात्परिकरः । 'अलंकारः परिकरः साभिप्रायं विशेषणे' ॥ ३ ॥

इदानीमष्टमूर्त्यात्मकत्वादिना रुद्रं स्तौति—

**रसाघनरसानलानिलवियद्विवस्वद्विधुप्रयष्टृषु निविष्टमित्यज भजामि मूर्त्यष्टकम् । प्रशान्तमुत भीषणं भुवनमोहनं चेत्यहो वपूंषि गुणपुंषि तेऽह-महमात्मनोऽहं भिदे ॥ ४ ॥**

रसेति ॥ 'अ इति ब्रह्मे'ति श्रुतेः । आद्विष्णोः सृष्टिसृष्टौ जायत इत्यजो रुद्रः । 'अजा विष्णुहरच्छागा' इत्यभिधानात् तस्य सम्बुद्धिः । हे अज रुद्र । रसाघनरसानलानिलवियद्विवस्वद्विधुप्रयष्टृषु रसा पृथिवी सा च 'गौर्गोत्रा जगती रसा क्षिति'रिति हलः । घनरसं जलं तच्च । 'आपस्तोयं घनरसं पय' इति हलः । अनलोऽग्निः स च । अनिलो



बन्धनादिना वशीकर्तुमशक्यत्वं दर्शितम् । सती पतिव्रता 'सती साध्वी पतिव्रते'त्यमरः । सती सतीनाम्नी पार्वती । स्वस्याः पार्वत्या या भक्तिः रुद्रे भक्तिः सैव लता तया । यं रुद्रं वशीकृतवती अवशो वशः सम्पद्यते तं तथा करोतीति वशीकृतवती । अतो भवान् स्वभक्तवशतः स्वस्यात्मनो ये भक्तास्तेषां वशोऽधीनस्तस्मादिति ततः । भावप्रधानो निर्देशः । स्वभक्तवशत्वत इत्यर्थः । वशी अन्याधीनशीलः । अनेन भक्ताधीनत्वं दर्शितम् । एतादृशमाहात्म्योपेत प्रभो सर्वसमर्थ शिव । त्वं मे प्रसीद प्रसन्नो भवेत्यन्वयः । 'षद्लृ विशरणगत्यवसादनेषु' लोट् ॥ २ ॥

टिप्पणी—(ललामायितं रत्नवदाचरितं । भवान् वशी स्वतन्त्रः तथापि स्वभक्तवशतः स्वकीय-भक्ताधीनत्वतः मह्यं प्रसीद) ललामायित इति वर्तुलत्वादिधर्मस्यानुपादानाल्लुप्तोपमा । भक्तिरेव लतेति रूपकालंकारः । वृत्त्यनुप्रासश्च स्मरः स्मरः सती सतीति । पुनरुक्तवदाभासश्च । 'विषय्यभेदताद्रूप्यरंजनं विषयस्य यत् । रूपकम्' । 'पुनरुक्तप्रतीकाशं पुनरुक्तार्थसन्निभम्' स्वभक्तवशत्वस्य सत्या भक्तिवशीकृतत्वेन समर्थनाद्वाक्यार्थहेतुककाव्यलिंगालंकारश्च' 'हेतोर्वाक्यपदार्थत्वे काव्यलिंगमुदाहृतम्' ॥ २ ॥

अतोऽतिरिक्तरूपाणि च । गुणैर्बलज्ञानादिगुणैः पुष्यन्ते पूर्यन्त इति गुणपुंषि गुणाढ्यानीत्यर्थः । इत्यनेन गुणाढ्यत्वरूपसामान्यप्रकारेण च । अहम् अहंभिदेऽहङ्कारनाशाय भजामीत्यन्वयः ॥ ४ ॥

टिप्पणी—(अहमित्यव्ययमहंकारवाचकम् । अहंकारस्यात्मा अभिमानी । अहंभिदे देहादावहं ममत्वलक्षणाभिमाननिवृत्तये) शान्तत्वभीषणत्वमोहनत्वादीनां विरोधवदवभासाद्विरोधाभासः । अहंकारभेदनेऽहंकाराभिमानिन एव शक्तत्वाभिप्रायात्परिकरश्च । वृत्त्यनुप्रासश्च ॥ ४ ॥

इदानीमहं स्वशक्त्या इदं करोमीति विस्मयं परिहरति—

**विमुक्तिपरमाध्वनां तव षडध्वनामास्पदं पदं निगमवेदिनो जगति वामदेवादयः । कथञ्चिदुपशिक्षिता भगवतैव संविद्रते वयं तु विरलान्तराः कथमुमेश तन्मन्महे ॥ ५ ॥**

**विमुक्तीति** ॥ विमुक्तिपरमाध्वनां विमुक्तौ बन्धमोक्षे परमाश्च तेऽध्वानो मार्गाश्च ते परमाध्वानस्तेषाम् । वादिभिर्मोक्षसाधनत्वेनाभिमतानामित्यर्थः । षट् च तेऽध्वानश्च षडध्वानस्तेषां षडध्वनां षड्दर्शनमार्गाणामित्यर्थः । आस्पदं प्रतिपाद्यम् । षड्दर्शनेषु प्रकृतिकर्मादीनां प्रतिपादनेऽपि शिवान्तर्गतस्य विष्णोरेवान्तर्यामित्वादन्तर्यामिहरिविषयैव मुक्तिरिति गम्यते । तत्र पदं स्वरूपम् । निगमवेदिनो निगमान् वेदान् विदन्ति जानन्तीति निगमवेदिनो वामदेवादयः वामदेवो वामदेवाख्यो मुनिः स एवादिर्येषां ते वामदेवादयो मुनयः । हे संविद्रते संविदि भगवज्ज्ञाने रतिरासक्तिर्यस्य स तथोक्तस्तस्य सम्बुद्धिः हे संविद्रते रुद्र । भगवता षड्गुणसम्पन्नेन त्वयैव । संशिक्षिताः सन्तःसम्यगुपदिष्टाःसन्तः । जगति कथञ्चित् । जानन्तीति शेषः । संविन्दत इति पाठे संविन्दते लभन्त इत्यर्थः । 'विदुर्लाभे' लट् । विरलान्तराः विरलं चपलमान्तरं मनो येषां ते विरलान्तराः वयं तु । तद्भगवतः स्वरूपं कथं मन्महे जानीमः । 'मनु अवबोधने (मदिहर्षे?)लट् ॥ ५ ॥

सटीका

॥ ६ ॥

टिप्पणी – (भगवतैव ज्ञानमुक्तिवैराग्यादिगुणवतैव त्वया । पदं ज्ञेयं परं ब्रह्मतत्त्वरूपं वा । संविद्रते जानन्ति । 'समोगम्यृच्छिप्रच्छिस्वरत्यर्तिश्रुविदिभ्य' इति विदेरात्मनेपदम् । 'वेत्तेर्विभाषा' इति रुट् । यद्वा संविद्रते संविदि ज्ञाने रतिर्यस्य तत्सम्बुद्धिः । तदा जानन्तीति शेषः । हे उमेश । विरलमल्पविषयमन्तरं मनो येषाम् । तत्परब्रह्मस्वरूपम् । यदा विज्ञा वामदेवादयस्त्वदुपदिष्टास्तदुपास्यं ब्रह्म त्वत्स्वरूपं वा कार्त्स्न्येन ज्ञातुमशक्तास्तदाल्पज्ञा वयं कथं सामस्त्येन मन्महे इति भावः) साकल्येन ज्ञातुमशक्यत्वं प्रति वामदेवादिदुर्ज्ञेयत्वस्य हेतुत्वाद्वाक्यार्थहेतुककाव्यलिंगालंकारः । 'पाणिनेर्जैमिनेश्चैव व्यासस्य कपिलस्य च । कणादस्याक्षपादस्य दर्शनानि षडेवहि' ॥ ५ ॥

ताण्डवरुद्रं स्तौति—

**कठोरितकुठारया ललितशूलया वाहया रणड्डमरया स्फुरद्धरिणया सखट्वाङ्गया । चलाभिरचलाभिरप्यगणिताभिरुन्नृत्यतश्चतुर्दश जगन्ति ते जय जयेत्ययु(यु)र्विस्मयम् ॥ ६ ॥**

कठोरितेति ॥ हे रुद्र । चतुरधिका दश चतुर्दश जगन्ति लोकाः । कठोरितः कठोरः कुठारः परशुर्यस्यां सा कठोरितकुठारा तथा कठोरितकुठारया । बाहया बाहुना । ललितं मनोहरं शूलं यस्यां सा ललितशूला तया ललितशूलया बाहया । रणन् शब्दं कुर्वन् डमरो डमरुको यस्यां सा तया रणड्डमरया । बाहया । स्फुरद्धरिणया स्फुरन् हरिणो मृगो यस्यां सा स्फुरद्धरिणा तया स्फुरद्धरिणया बाहया । सखट्वाङ्गया खट्वाङ्गेन खट्वाङ्गाख्यायुधविशेषेण सहिता सखट्वाङ्गा तया सखट्वाङ्गया बाहया ॥ चलाभिर्नृत्यताभिनयं दर्शयितुं चलनं प्राप्ताभिः । अचलाभिः चला न भवन्तीत्यचलास्ताभिरचलाभिः । अगणिताभिर्गणिताः सङ्ख्याता न भवन्तीत्यगणितास्ताभिरगणिताभिर्बाहाभिरपि । उन्नृत्यति उत्कृष्टतया नृत्यतीति उन्नृत्यन् तस्योन्नृत्यत उत्कृष्टनर्तनं कुर्वतस्ते तव । रूपं दृष्ट्वेति शेषः । जय जयेत्युक्त्वा विस्मयमगुर्जग्मुः । 'इण् गतौ' लुङ् ॥ ६ ॥

सटीका ॥ ७ ॥

शिवस्तुति

टिप्पणी—(चतुर्दशभुवनानि तन्निष्ठा जना इति यावत् । जय जयेति नन्दन्तो विस्मयमयुः प्रापुः) कुठारशूलडमरुहरिणखट्वांगाख्यायुधानि शिवस्य भुजस्थानि वर्णितानि । वृत्त्यनुप्रासोऽलंकारः । अगणित-चलाचलबाहुमण्डलविशिष्टशिवताण्डवनर्तनं तदन्येनाकृतत्वादखिललोकविस्मापकमित्यनेन शिवस्य महिमानन्यसाधारण इति व्यज्यते ॥ ६ ॥

शिवपराक्रमं वर्णयति—

**पुरत्रिपुररन्धनं विविधदैत्यविध्वंसनं पराक्रमपरम्परा अपि परा न ते विस्मयः । अमर्षबलहर्षितक्षुभितवृत्तनेत्रत्रयोज्ज्वलज्वलन(त्रोज्ज्वलज्वल-ज्ज्वलन)हेलया शलभितं हि लोकत्रयम् ॥ ७ ॥**

पुरेति ॥ हि यस्मात् । लोकत्रयं लोकानां त्रयं लोकत्रयं तत् । अमर्षबलहर्षितक्षुभितवृत्तनेत्रत्रयोज्ज्वलज्वलनहेलया अमर्षः क्रोधः स च बलं च हर्षितं हर्षस्तैश्च तैः क्षुभितानि क्षुब्धानि यानि वृत्तनेत्राणि वर्तुलनेत्राणि तेषां त्रयं तस्य उत्कृष्टा ज्वला ॥ ७ ॥

ज्वाला यस्य स उज्ज्वलस्तादृशो यो ज्वलनोऽग्निस्तस्य हेला लीला तया । शलभितं शलभवदाचरितम् । यथा शलभोऽग्नौ भस्मीभवति तथा भस्मीभूतं प्रलयकाल इत्यर्थः । पुरत्रिपुररन्धनं (पुराणि?) पराणि श्रेष्ठानि च तानि त्रिपुराणि (पु) परत्रिपु-राणि तेषां रन्धनं भस्मीकरणम् । विविधदैत्यविध्वंसनं विविधा नानाविधा ये दैत्यास्तेषां विध्वंसनं संहारः । एवमाद्याः परा उत्कृष्टाः पराक्रमपरम्परा अपि पराक्रमाणां परम्परास्ता अपि । हे शिव । ते तव । विस्मयो न आश्चर्यं न । इतोऽप्यतिमाहात्म्यवत्त्वादिति भावः ॥ ७ ॥

टिप्पणी—(हे अमर्षबलहर्षित अमर्षबलाभ्यां कोपसामर्थ्याभ्यां हर्षित हर्षं प्राप्त । क्षुभितं क्षोभ-युक्तं वृत्तं वर्तुलं यन्नेत्रं तत्सामर्थ्यादुज्ज्वलः प्रकाशमानो ज्वलन् दहन् ज्वलनोऽग्निस्तस्य हेलया ज्वाला-विलासेन) त्रिपुरादिदाहस्य अविस्मयत्वं प्रति लोकत्रयदाहस्य हेतुत्वाद्वाक्यार्थहेतुककाव्यलिंगालंकारः शलभितमित्यत्रोपमालंकारश्च ॥ ७ ॥

इदानीं स्वाभीष्टं ज्ञानं प्रार्थयते—

**सहस्रनयनो गुहः सहसहस्ररश्मिर्विधुर्बृहस्पतिरुताप्पतिः ससुरसिद्धविद्याधराः । भवत्पदपरायणाः श्रियमिमामगुः(मां ययुः)प्रार्थिनां भवान् सुरतरुर्दृशं दिश शिवां शिवावल्लभ ॥ ८ ॥**

शिवस्तुति

**सहस्रेति** ॥ शिवावल्लभ शिवायाः पार्वत्याः वल्लभः प्रियस्तत्सम्बुद्धिः शिवावल्लभ । भवत्पदपरायणाः भवतः पदे पादौ ते परायणे मुख्याश्रयभूते येषां ते तथोक्ताः । ससुरसिद्धविद्याधराः सुराश्च सिद्धाश्च विद्याधराश्च तैः सहिताः ससुरसिद्धविद्याधराः । सहस्रनयनः सहस्रं नयनानि यस्य स सहस्रनयनः इन्द्रः । गुहः षण्मुखः सहसहस्ररश्मिः सहस्रं रश्मयो यस्य स सहस्ररश्मिः सूर्यस्तेन सह वर्तमानः सहसहस्ररश्मिः सूर्येण सहित इत्यर्थः । विधुश्चन्द्रः । बृहस्पतिः । उतानन्तरम् अपां पतिरप्पतिर्वरुणः । इत्येते इमां स्वपदप्राप्तिलक्षणां श्रियमैश्वर्यमगुः प्रापुः । अतो भवान् । प्रकर्षेणार्थयन्तं प्रार्थयन्ते ॥ ८ ॥

वायुः स च। वियद्व्योम तच्च। विवस्वान् सूर्यः स च। विधुश्चन्द्रः स च। प्रयष्टा अग्निहोत्री स च। तेषु निविष्टमन्तर्यामितया रूपविशेषैराविष्टम्। अहमात्मनोऽहमहङ्कारतत्त्वमात्मा देहो यस्य सः अहमात्मा तस्याहङ्कारतत्त्वाभिमानिन इत्यर्थः। ते तव मूर्त्यष्टकं मूर्तीनामष्टकं मूर्त्यष्टकं तत्। इति पृथिव्यादिस्थितत्वादिप्रकारेण। अहं भिदे अहमोऽहङ्कारस्य भिद् भेदनं विनाशोऽहंभित्तस्यै अहंभिदेऽहङ्कारनाशायेत्यर्थः। संसारनाशायेति यावत्। भजामि भजे सेवयामि 'भज सेवायां' लट्। उत अनन्तरम्। प्रशान्तं प्रकर्षेण शान्तं प्रशान्तं तत्। तपश्चरणार्थं शमाद्युपेतं किञ्चिद्रूपजातमित्यर्थः। उत भीषणं भीषयतीति भीषणं दुष्टनिग्रहाय भीषणाकारं किञ्चिद्रूपजातमित्यर्थः। उत भुवनमोहनं भुवनानि मोहयतीति भुवनमोहनम् अतिसुन्दरत्वेन पार्वत्यादिजगन्मोहकमित्यर्थः। इति प्रशान्तत्वादिप्रकारेण। अहम् अहंभिदेऽहङ्कारनाशाय भजामि अहो आश्चर्यम्। एकस्यैव शिवस्य नानाविधोक्तविलक्षणरूपित्वमाश्चर्यमिति भावः। उत ते तव वपूंषि वेदादिषु प्रसिद्धानि।

तरूछीला इति प्रार्थिनस्तेषां स्वाभीष्टप्रार्थनं कुर्वतामित्यर्थः । सुरतरुः कल्पवृक्षः । यथा कल्पवृक्षो वाञ्छितं ददाति । तथा सर्वभक्तानां सर्वाभीष्टप्रद इति भावः । अतस्तव भक्ताय मह्यं शिवां मङ्गलां दृशं ज्ञानम् । दिश देहि । 'दिश अतिसर्जने' लोट् ॥ ८ ॥

टिप्पणी—(भवत्पदं भवदुपास्यं ब्रह्म परमयनमाश्रयो येषां ते भवत्पदपरायणाः सन्त इमां तद्योग्याम् । श्रिय सम्पदं ययुः प्रापुः । दृशं दृष्टिं दिश) इमां शास्त्रप्रसिद्धां त्रिलोकाधिपतित्वादिलक्षण-सम्पदमगुरित्यनेन इन्द्रादिसकलदेवोत्तमत्वं महामहिमशालित्वं च प्रतीयते । प्रार्थिनां सुरतरुरिति रूपकालंकारः । ज्ञानदानं प्रति सुरतरुरिति वाक्यार्थो हेतुरिति वाक्यार्थहेतुककाव्यलिंगं च । वृत्त्यनुप्रासश्च शब्दालंकारः ॥ ८ ॥

इदानीं रुद्रं हरिपरत्वेन स्तौति—

तव प्रियतमादतिप्रियतमं सदैवान्तरं पयस्युपहितं घृतं स्वयमिव
श्रियो वल्लभम् । विभिद्य लघुबुद्धयः स्वपरपक्षलक्ष्यायितं पठन्ति हि
लुठन्ति ते शठहृदः शुचा शुण्ठिताः ॥ ९ ॥

तवेति ॥ लघ्वी सूक्ष्मा बुद्धिर्येषां ते लघुबुद्धयः सूक्ष्मार्थग्राहिबुद्धयः वामदेवादयः । हे रुद्र । तव । अतिशयेन प्रियं प्रियतमं तस्मात् प्रियतमात् अतिप्रियादित्यर्थः । प्रियतममतिशयेन प्रियम् । सदैव सर्वस्मिन् काले । अन्तर्हृदयाकाशे रमत इत्यन्तरस्तम् । स्वपरपक्षलक्ष्यायितं स्वपक्षः स्वसिद्धान्तः परपक्षः परसिद्धान्तस्तयोर्लक्ष्यवदाचरतीति लक्ष्यायितः विषयीभूतस्तम् । स्वपक्षे सर्वोत्तमः सा(मता?)ध्यत्वेन परपक्षे सर्वोत्तमो नेति सिद्धान्तिनो विषयीभूतमित्यर्थः । श्रियो लक्ष्म्या वल्लभः प्रियस्तम् । हरिम् । पयसि क्षीरे उपहितं निगूढं घृतमिव । विभिद्य वेदशास्त्रविचारेण रुद्रादिविभिन्नत्वेन प्रतिपाद्य । स्वयं पठन्ति 'पठ व्यक्तायां वाचि' लट् । हीत्यनेन परानुपदिशन्ति च । शुचा मिथ्याज्ञानजनितदुःखेन हरिशङ्करयोर्भेदो नास्तीत्यादिमिथ्याज्ञानजनितदुःखेनेत्यर्थः । शुण्ठिताः प्रतिहताः । 'शुण्ठ प्रतिघाते' इति धातोः । मूर्छिता वा । शठं गूढद्वेषयुक्तं हृत् अन्तःकरणं येषां ते शठहृदः । लुठन्ति नरके इतस्ततः लुठनं कुर्वन्ति 'लुठ गतौ' लट् ॥ ९ ॥

टिप्पणी—(प्रियतममतिप्रियतमं निरुपाधिविषयमेकान्तभक्तत्वात् । तदुक्तम्—'एकान्तानां न कश्चित् । अर्थे नारायणो देवः सर्वमन्यत्तदर्थक'मिति । आन्तरमन्तरं वर्तमानम् । विभिद्य सुवेद्य । क्षीरस्थघृतं क्षीरादिविवेकेन यथा तथा त्वदन्तःस्थं ब्रह्म ज्ञात्वा पठन्ति शिष्येभ्य उपदिशन्ति । शठहृदः वंचनचित्ताः ये ब्रह्मवादिनस्ते शुचा शोकेन शुण्ठिताः स्तम्भिता लुठन्ति निरये पतन्ति । 'एवं तत्समुपासीना न मुह्यन्ति शुचार्पिता' इति भागवते जीवात्मभेदज्ञानमेव मोक्षसाधनं नाद्वैतज्ञानमिति भावः) अत्र घृतमिवेत्युपमानलिंगसाम्यापेक्षया श्रियो वल्लभं लक्ष्मीप्रियाख्यं परब्रह्मेति नपुंसकलिंगत्वं वक्तव्यम् । उपमालंकारः । वृत्त्यनुप्रासश्च । स्वयं स्वेच्छयोपहितमित्यनेन हरेः स्वातन्त्र्यं बोध्यते । सदैव प्रियतममित्यनेन निरन्तरध्यानविषयभगवत्प्रीतिपात्रत्वेन निरतिशयैश्वर्यशालित्वं शिवस्य प्रतीयते ॥ ९ ॥

इदानीं मङ्गलप्रदत्वेन रुद्रं स्तौति—

**निवासनिलयश्चिता तव शिरस्ततिर्मालिका कपालमपि ते करे त्वमशिवोऽस्यनन्तर्धियाम् । तथापि भवतः पदं शिव शिवेत्यदो जल्पतामकिञ्चन न किञ्चन वृजिनमस्त्यभस्मीभवत् ॥ १० ॥**

निवासेति ॥ हे शिव । तव । अपि यद्यपि । निवासस्य अवस्थानस्य निलयः गृहं निवासनिलयः चिता स्मशानम् । शिरस्ततिः शिरसां पङ्क्तिर्मालिका कण्ठमाला । ते करे हस्ते कपालमस्ति । अन्तर्धीर्येषां तेऽन्तर्धियस्ते न भवन्तीत्यनन्तर्धियस्तेषामध्यात्मज्ञानरहितानामित्यर्थः । अशिवोऽमङ्गलोऽसि । तथापि । न विद्यते किञ्चन द्रव्यं यस्य सोऽकिञ्चनस्तत्सम्बुद्धिः हे अकिञ्चन विरक्त । भवतः शिव शिवेति अदः तत् श्रुतिप्रसिद्धमित्यर्थः । पदं नाम । जल्पतां जपताम् । किञ्चन किञ्चित् । वृजिनं पापम् । भस्मीभवतीति भस्मीभवत् तन्नभवतीत्यभस्मीभवत् । नास्ति । आर्जितं सर्वमपि पापं भस्मीभवतीत्यर्थः ॥ १० ॥

टिप्पणी—(अनन्तर्धियां बहिर्दृष्टीनां पामराणाम्) स्मशानादिवासित्वादमंगलवदवभासमानस्यापि स्वनामपाठकसर्वाघविनाशकत्वेन शिवस्यात्यन्तमंगलत्ववर्णनाद्विरोधाभासोऽलंकारः । तदितरेषां स्मशानवासादिकर्मणो दुष्टत्वेऽपि अकिंचनस्य विरक्तशिखामणेः जलमध्यगतपद्मपत्रस्येवासक्तस्य शिवस्य गुणाधायकत्वमेवेति शिवमाहात्म्यातिशयः सर्वविलक्षण इति व्यज्यते ॥ १० ॥

इदानीं विरुद्धत्वेन स्तौति—

त्वमेव किल कामधक् सकलकाममापूरयन् सदा त्रिनयनो भवान् वहसि चात्रिनेत्रोद्भवम् । विषं विषधरान् दधत्पिबसि तेन चानन्दवान् विरुद्धचरितोचिता जगदधीश ते भिक्षुता ॥ ११ ॥

त्वमेवेति ॥ विरुद्धं चरितं कर्म यस्य स तथा तत्सम्बुद्धिः हे विरुद्धचरित जगदधीश । जगतोऽधीश । त्वम् । सकलानां सर्वेषां भक्तजनानां यः कामो वाञ्छितार्थस्तम् । आपूरयतीत्यापूरयन् । त्वमेव । कामं दहतीति कामधक् । किलेत्यनेन पुराणप्रसिद्धिं द्योतयति । अनेन कामाभिवर्धकस्य कामदग्धृत्वं विरुद्धमिति विरुद्धचरितत्वं दर्शितम् । भवान् । त्रीणि नयनानि यस्य स त्रिनयनः सदा भवति । तथापि । अत्रिनेत्रोद्भवम् अत्रेरत्रिमुनेर्ये नेत्रे ताभ्यामुद्भवतीत्यत्रिनेत्रोद्भवश्चन्द्रस्तम् । वहसि 'वह प्रापणे' लट् । अनेनापि सदा त्रिनेत्रस्य अत्रिनेत्रोद्भवधारित्वं विरुद्धमिति विरुद्धचरितत्वं दर्शितम् ।

विषं धारयन्तीति विषधराः सर्पास्तान् दधत् धारयन् 'नाभ्यस्ताच्छतुरिति' नुमभावः । त्वं विषं पिबसि 'पा पाने' लट् । तेन च विषपानेन च । आनन्दोऽस्यास्तीत्यानन्दवान् । असि । विषपानेनानन्दवानित्यनेनापि विरुद्धचरितत्वं स्फुटम् । जगदधीश रुद्र । ते भिक्षुता भिक्षाटनमुचिता विरुद्धचरितत्वादेव जगदधीशस्यापि भिक्षाटनमुचितमिति भावः ११

॥ ११ ॥

टिप्पणी—(अत्र शब्दमात्रे सामान्येन विरोधभावः । अर्थभेदाद्विरोधपरिहारः । विरोधाभासोऽलंकारः) त्रिनेत्रस्य त्रिनेत्रोद्भवभिन्नवहनं विषधारकस्य विषधरधारकत्वं लोकादृष्टत्वात् तथा विषविषधरधारणेऽपि आनन्दवत्त्वं च विरुद्धम् । एतेन सर्वातिशायिमाहात्म्यं व्यज्यते ॥ ११ ॥

इदानीं नानानामभिर्नमति—

**नमः शिव शिवाशिवाशिव शिवार्ध कृन्ताशिवं नमो हर हराहराहर-हरान्तरीं मे दृशम् । नमो भव भवाभवप्रभव भूतये सम्पदां नमो मृड नमो नमो नम उमेश तुभ्यं नमः ॥ १२ ॥**

॥ ११ ॥

नमश्शिवेति ॥ शिव मङ्गल । शिवयति मङ्गलयतीति शिवः तत्सम्बुद्धिः हे शिव मङ्गलप्रद । अशिवानमङ्गलान् दैत्यान् अशिवयति अमङ्गलयतीत्यशिवाशिवः तत्सम्बुद्धिः । हे अशिवाशिव । 'शिवा भवानी'त्यभिधानात् शिवा पार्वती अर्धे शरीरवामार्धे यस्य स शिवार्धः तत्सम्बुद्धिः हे शिवार्ध । तुभ्यं नमः । त्वं मे । शिवं नभवतीत्यशिवममङ्गलं कृन्त छेदय । कृती छेदने' लोट् । हे हर । तुभ्यं नमः । अन्तरे भवा आन्तरी तामान्तरीमन्तर्विद्यमानां दृशं दृष्टिं ज्ञानदृष्टिमित्यर्थः । अहरहः प्रतिदिनमित्यर्थः । आहर देहि । 'हृञ् हरणे'लोट् । हे भव रुद्र तुभ्यं नमः । 'अ इति ब्रह्मे'ति श्रुतेः । आत् अकारवाच्यान्नारायणाद् भवतीत्यभवः ब्रह्मा तस्मात्प्रभवतीत्यभवप्रभवः तत्सम्बुद्धिः हे अभवप्रभव रुद्र । मम सम्पदामैश्वर्याणां भूतये उत्पत्तये भव 'भूसत्तायां' लोट् । हे मृड रुद्र तुभ्यं नमो नमः । उमेश पार्वतीश तुभ्यं नमो नमः ॥ १२ ॥

टिप्पणी—(हे शिवशिव शिवानां योग्यजीवानां शिवं करोतीति शिवशिवेति सम्बुद्धिः । 'तत्करोति तदाचष्ट' इति णिजन्ताच्छिवयतः सुब्धातोः पचादेराकृतिगणत्वादच्प्रत्ययः । अशिवाशिव अयोग्य जीवानामशुभोऽशुभकरस्तत्सम्बुद्धिः । हरहरेत्यादराद्द्विरुक्तिः । अन्तेऽन्तरं सर्वं यस्य रस्यत इत्यन्तरो विष्णुस्तत्सम्बन्धिनीं दृशं ज्ञानम् । आदरनैरन्तर्याभ्यां नमो नमः कर्तव्यमिति पुनःपुनरुक्तिः) 'सजातीयाव्यवहितवर्णा द्वित्रादयो यदि । आवर्तन्ते तदा केचिच्छेकानुप्रासमूचिरे' इत्युक्तलक्षणवत्तयात्र छेकानुप्रासः । पक्षान्तरे वृत्त्यनुप्रासः ॥ १२ ॥

केनेयं स्तुतिः कृतेत्यत आह—

**सतां श्रवणपद्धतिं सरतु सन्नतोक्तेत्यसौ शिवस्य करुणाङ्कुरात्प्रति-**
**कृतात्सदा सोदिता । इति प्रथितमानसो व्यधित नाम नारायणः शिव-**
**स्तुतिमिमां शिवां लिकुचिसूरिसूनुः सुधीः ॥ १३ ॥**

**इति श्रीमत्त्रिविक्रमपण्डिताचार्यसुतश्रीमन्नारायणपण्डिताचार्यविरचिता**
**शिवस्तुतिः समाप्ता ।**

**सतामिति** ॥ लिकुचे लिकुचवंशे सुरिः विद्वान् त्रिविक्रमपण्डिताचार्यस्तस्य सूनुः पुत्रः लिकुचसुरिसूनुः । सुशोभना धीर्यस्य स सुधीः धीमान् । प्रथितं प्रसिद्धं मानसं मनो वा मनोवृत्तिज्ञानं वा यस्य सः । प्रथितमानसः । नारायणो नाम नारायणपण्डिताचार्यनामा । शिवां मङ्गलामिमां शिवस्तुतिमित्यनेन प्रकारेण व्यधित चकार 'डुधाञ् धारणपोषणयोः' लुङ् । यतः सा स्तुतिः प्रतिकृता प्रकर्षेण कृता । तस्मात् शिवस्य करुणैव दयैवाङ्कुरस्तस्मात् । इति पूर्वोक्तप्रकारेण । उदिता उत्पन्ना सन्नतोक्ता सम्यङ् नतः सन्नतः तेन मया उक्ता । असौ सा स्तुतिः सतां सज्जनानां श्रवणमेव श्रोत्रमेव पद्धतिः मार्गस्तां प्रति । सदा सरतु गच्छतु 'सृ गतौ' लोट् । सदाशिवानुग्रहेणैवास्य स्तोत्रस्य कृतत्वात्तत्प्रसादार्थिभिरियं स्तुतिः सदा श्रोतव्या पठनीया चेति भावः ॥ १३ ॥

इति श्रीनारायणपण्डिताचार्यविरचितायाः शिवस्तुतेः टीका श्रीमद्विश्वपतितीर्थयतिवरविरचिता समाप्ता ।

टिप्पणी—शिवस्तुत्याख्यखण्डकाव्येऽत्र 'जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरु'रित्युक्तलक्षण पृथ्वीवृत्तम् । पद्येऽत्र वृत्त्यनुप्रासः । करुणैवांकुर इत्यत्र रूपकमित्यनयोस्तिलतण्डुलवत्संसृष्टिः ॥ १३ ॥

व्याख्यान्तरोक्तभावानां संग्रहं रचयन्नहम् ।
कृतवान् श्रीनिवासाख्यो व्यंग्यालंकृतिटिप्पणीम् ॥
इमां कृतां यथाशक्ति शिवस्तुतिसुटिप्पणीम् ।
श्रीमद्विद्यापूर्णहंसहृद्गकृष्णे न्यवेदयम् ॥

इति श्रीविद्यापूर्णपरमहंसपूज्यपादान्तेवासिसाहित्यशिरोमणिश्रीनिवासभट्टप्रणीता
शिवस्तुतिटिप्पणी समाप्ता ।

॥ श्रीकृष्णार्पितास्तु ॥

# इति सटीका शिवस्तुतिः





